एकाहान्याहितः पृथक्कामेतिसतिरात्रास्तेषामाघुस्त्र्ययएकाहिकशस्याइतिसकाहाः
अथाहीनाद्यहप्रभृतयोद्वादशरात्रपरार्ध्याअग्निष्टोमाद्यातिरात्रांतामासापव
र्गाअपरिमाणदक्षिणएकाहाश्वेतरेयिओग्नीष्टोमिस्पोतिरात्रस्याः ताः साहस्राश्च
दक्षिणाअतिरात्राश्चसर्वशस्त्रानाकांसंख्याः संख्याताः अहीतांअभिष्ठवाद
तिनांगूस्त्वेसः संख्यापूरणेगहीनानांहानेवैश्वानरोधिकः॥१॥ आंगिरसंस्वर्ग
कामोयोवापुष्योहीनोनुप्रेप्सेत्स्याच्चैत्ररथमन्नाद्यकामः कापिवनंस्वर्गकाम

श्रौ॰ उ॰ ३१

दूतिष्ठ्यहाः प्रथमस्य तत्तस्याऽऽकृस्तान्त्रियं तृतीयसवनं त्वं हि क्षैतवदिति वाऽऽज्यं गर्गत्रि
रात्रं स्वर्गकामस्तस्य मध्यमस्याह्नो वामदेव्यं पृष्ठं विशो विशीयमग्निष्टोमसाम वारवंतीय
मुत्तमे त्वमग्ने वसूंधरिति चाऽऽज्यं वैदत्रिरात्रं राज्यकामः सर्वे त्रिवृतो तिरात्राः छंदोमपवमा
नांतवसिपशुकामः पराक छंदोमपराकौ स्वर्गकाम इति व्यहा गर्गत्रिरात्रशस्या अत्रेश्चतु
व्रं वीरकामस्तस्य वीरवं साऽऽज्यानि यमग्ने वाजसातमेति द्वितीयेऽन्याऽऽज्यमग्न आयाम
र्य इति तृतीये ग्निं नर इति चतुर्थे षोडशिमश्चतुर्थं तस्याभि त्वा वृषभा सुत इति गायत्री
पुरथंतरं पृष्ठमनुष्टुप् बृहतीषु बृहच्चतुर्थे संवलस्य गोमतो यज्ञायथा अपूर्व्येति वाऽऽज्यमप्त
पुष्टिकामः स्वस्यं पुरोडाशिन्य उपसदो वैश्वामित्रं धाल्त्वव्य वाग्र आकामो वसिष्ठसंसर्प ३१

मिति चतुरहाः सार्वसेनं पशुकामो देवं भा तव्य वान्पंचशारदीयं पशुकामो व्रतवं
तमायुष्कामो बाबरं वाकूप्रवद्विगुरिति पंच पंचरात्राः पंचशारदीयस्य तु सप्तदशो
क्षाणं ऐंद्रामारुताम् आनुतीभिः सहवत्सतरीभिः सप्तदशाभिः सप्तदशभिः पंचव
र्षपर्यग्निकृताः सवनीयास्तेषां त्र्यो स्त्री चतुर्थेऽहः स्वाळंभेरन् परिशिष्टान्वपं
मे व्रतवतस्कृतीयस्याह्नः स्थाने महाव्रतं पृष्ठ्यपंचाहउत्तमः ॥ २ ॥ अक्तृतां षष्
ठहं प्रतिष्ठाकामः पृष्ठ्यः स्तोमं क्लोभं क्लोपापृष्ठ्या वलौ बे पशुकामः पृष्ठ्यपंचाहो
भ्यासेक्तो विश्वजिद्ब्रसं भार्य्यमायुष्कामः पृष्ठ्यव्यहः पूर्वो भिलव्यहश्चत्र
पिसप्तनात्रमृद्धिकामः प्राजापत्यं प्रजाकामः छंदोमपवमानव्रतं पशुकामो

श्रौ.उ.

३२

नामदग्नमन्नाद्यकामएते चत्वारः पृष्ठ्योमहाव्रतं च व्रतं तु सर्वस्तोमः प्रथमे सप्तदशं द्वि
तीये छंदोमपवमानं तृतीये चतुर्विंशो बहिष्पवमानः सप्तदशः शेषश्चतुर्थे एद्व मत्स्यन्या
प्रजावृष्भं पंस्त्रिककुद्का अभिजिद्विश्वजिन्महाव्रतं सर्वस्तोमो जनक सप्तरात्रम् र्द्धिकामोऽभि
प्लवचतुरहो विश्वजिन्महाव्रतं ज्योतिष्टोमः पृष्ठ्यस्तोमो विश्वजित् पशुकामस्य सप्तनोदेवव
मीप्सतोऽष्टरात्रः पृष्ठ्यो महाव्रतं ज्योतिष्टोमो नवरात्रमायुष्कामः पृष्ठ्यस्त्रिककुद्का अन्ते त्रिककुद्का
पृष्ठ्यावलंबइति पशुकामस्यैते नवरात्रौ त्रिककुब्मध्यः पृष्ठ्यो महात्रिककुब्व्यूढो नवरात्रः स
मूळ्हत्रिककुप्समूळ्हश्चतुष्टोमस्त्रिककुब्मध्यश्चाभिप्लव एतैश्चतुर्भिः स्वानां श्रैष्ठ्यकामो यजेत कु
सुरुबिंदुः रद्धिकामस्य याणा पृष्ठ्याह्नामेकैकं त्रिः छंदोमवन्तं पशुकामः पृष्ठ्यावलंबस्य प्रागि ३२

श्वजितश्छंदोमास्त्रयं चारः पुरास्ति चरज्योतिर्गामभिलेगोरभिजितं विश्वजिदायुषं पाललीपि
शंगश्रीकामोऽभिप्लवत्र्यहः पूर्वस्विरितिद्वादशरात्राः ॥ ३ ॥ पौंडरीकमृद्धिकामः पृष्ठ्यस्तोमश्छं
दोमा गोतमस्तोमो विश्वजिद्व्यूढो नवरात्रो महाव्रतं वैश्वानर इति वापसंख्यायो वातिरात्रश्च
तुर्विंशा नध्यज्योभिप्लवः पृष्ठ्यो विंद्वन्नभ्यात्व्यवान्पृष्ठ्यस्याद्ये अहनी व्यस्यास मानवरात्रा
न्महाव्रतं ॥ ४ ॥ अथ द्वादशाहाश्च वेयुः सत्राणि भवेयुरहीना वा कौ दशरात्रः समूळ्हो व्यूळ्हो
वा तन्मध्ये तेनातिरात्रौ संस्थाप्य यावा वैश्वानरमुपदध्यात् संवर्गश्च वल्हश्च श्रीकामोऽतिरात्रश्चतुर्विं
शौ चिपूर्वहज्योनवरात्रो महाव्रतमथ भरलद्वादशाह इमम् एकाहं पृथक्संस्था षिकपेसुरीति
रा चमग्नेथाग्निष्टोमनथाष्टाज न्नथान्नथाग्निष्टोममथातिरात्रमिति द्वादशाहास्तेरात्मनावु

स॰ उ॰

३२

भूषंतःप्रजयापशुभिःप्रजनयिष्यमाणाःस्वर्गंलोकमेष्यंतःस्वानांश्रैष्ठ्यमेछंतऽउपे
युर्वाजयेनवेतिपृथक्त्वमथसामान्यमपरिमितत्वाहुर्मस्यप्रदेशान्वक्ष्यामोयथा
हिपरिमितावर्णाअपरिमितावाचोगतिमांपुर्वंत्स्यैवमेवापरिमितानामक्त्रामप
रिमिताःसंघाताःसिद्धानिबहानितेषांयःकश्चसमाहारःसिद्धमेवयस्यमक्त्रासं
शयेस्तोमपृष्ठस्तस्तोभिरव्यवस्थांतरकरणंदृष्टत्वाद्ध्यातिक्रमस्यछंदोगेरेवकृता
समयमक्त्रोबार्हतराथंतरतायामेकाहेनराथंतरार्थंतराणांद्वितीयेनाभिप्लविकेन
बार्हतानामपिवायथाश्रुभीयतादिदासीयएवानिविद्धानीयेस्यालामेकाहिकमि ३२

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 167

Title: Aitareya brahmana
(Saptāmsa Pancika)

157

Incomplete

Aitareya Brāhmaṇa.
(Saptama pancikā)

~~Nirukta~~

:	:		: **Title**
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
157 :	:		: Remarks

प्रायश्चित्तिरित्यैंद्रं वा माहेंद्रं वेति समानं स्यात् तत्र प्रायश्चित्तिस्तदा कुर्यं स्यस्य सर्वोग्निर्वहन्वी
पिंडुष्वेय वी पहरेयुर्वी का तत्र प्रायश्चित्तिरित्याग्नयस्यैनानि यथादेवतं परिकल्प्य तयाग्न्य
हविषेष्यायजेतातोन्याभिष्टि मनुष्याणां तन्नीतयज्ञो यज्ञस्य प्रायश्चित्तिः ॥४॥ तदाकृ
ये स्याग्निहोत्रमधिश्रितममेध्यमापद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रु
व्याहि पर्यासिच्याहवनीये हैतां समिधमभ्यादध्यात्यथोत्तरतः आहवनी।
प्रा ५ यस्यांगारं भस्मान्निरूह्य तज्जुहुयात् मनसा वा प्राजापत्यया वा वीतदुतं वा हुतं वसयद्धक
रिमन्नुन्नीते यदि दुह्यो रेषु एव कल्यस्तद्वैव पनयितुं शक्नुयान्निश्छिब्द्यैतद्दुग्धमट्टुष्
मग्निपर्यासिच्य तस्य यथोन्नीतीस्यात्तथा जुहुयात् तत्र प्रायश्चित्तिस्तदा कुर्यस्याग्निहो
त्रमधिश्रितं स्कंदति वा निष्पंदते वा का तत्र प्रायश्चित्तिरिति तदद्भिरुपनिनयेत्का स्येरा

३

श्चित्तिरिति स यद्युपनिवर्तयेत्स्वर्गाल्लोकाद्यजमानमावर्तयेदुच्चैर्वास्मादुपविष्टायेतामग्निहोत्रपरिशेषमास्ये ४
ति दोआपोथेन दक्षिणेन पाणिनाभिमन्त्र्य जपति दिवं तृतीयं देवान्यज्ञो गात्ततो मा द्रविणमा
ष्टान्तरिक्षं तृतीयं पितॄन्यज्ञो गात्ततो मा द्रविणमाष्ट पृथिवीं तृतीयं मनुष्यान्यज्ञो गा
त्ततो मा द्रविणमाष्ट यो रोजसास्कभिता रजांसीति वैकुवारुणीमृचं जपति विष्कवै
॥४॥ यज्ञस्य दुरिष्टं पाति वरुणास्विष्टं तयोरुभयोरेव शान्त्यै सा तत्र प्रायश्चित्तिस्तदाहुर्यस्या
ग्निहोत्रमधिश्रितं प्राङुदायन्स्कन्दते वापि वा भज्यते का तत्र प्रायश्चित्तिस्तदाहुर्यस्य यदि ॥४॥
स्कन्निद्येत का तत्र प्रायश्चित्तिरिति यत्न्यांस्कन्दमाहुत्य जुहुयाद्यदेतांस्कन्नं वाभिमन्त्रमाह
वनीयमादध्याद्रागदण्डोपकूपस्कन्दं सा तत्र प्रायश्चित्तिः ।।५।। तदाहुर्यस्याहवनीयेह
निर्विद्येताथ गार्हपत्य उपशाम्येत्का तत्र प्रायश्चित्तिरिति स यदि प्राङमुद्धरेत्तायतना
त्स्स्य यथोन्नीतास्यात्तथा जुहुयात्सा तत्र प्राय ४

त्यनेतयस्त्रलंवमस्तुरवंद्य[illegible]ज्ञं तन्नीतयन्मंथेद्भ्रातृव्यं यजमानस्य जनयेद्यदनुगम
येत्प्राणो यजमानं जह्यात्सर्वमेवैनं सहभस्मानं समोप्य गार्हपत्यायतने निधाया
थ प्राञ्चमाहवनीयमुद्धरेत्सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नावग्निमुद्धरेयुः का तत्र प्राय
श्चित्तिरिति स यद्यनुपश्येदुद्धृत्य पूर्वमपरं निदध्याद्यद्यनानुपश्येत्सोऽग्नयेऽग्निवते
ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्नि[illegible]नाग्निः समिध्य
[illegible]ते त्वं ह्यग्ने अग्निनेत्याहुतिं वाहवनीये जुहुयादग्नयेऽग्निवते स्वाहेति सा
तत्र प्रायश्चित्तिस्तदाहुर्यस्य गार्हपत्याहवनीयौ [illegible] मिथः संसृज्येयातां का
तत्र प्रायश्चित्तिरिति सोऽग्नये वीतये ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये

अग्नआयाहिवीतयेयाअग्निंदेववीतयइत्याहुतिंवाहवनीयेजुहुयादग्नये
वीतयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यस्यसर्वएनाग्नयोमिथःसंसृज्ये
रन्कातत्रप्रायश्चित्तिरितिसोग्नयेविविचयेष्टाकपालंपुरोडाशंनिर्वपेत्तस्यया
॥५॥ ज्यानुवाक्येस्वर्णीवस्तोरुपसामरोवित्वामग्नेमनुषीरीळतेविशइत्याहुतिं ॥५॥
वाहवनीयेजुहुयादग्नयेविविचयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यस्या
ग्नयोन्यैरग्निभिःसंसृज्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेक्षामवतेष्टाकपा
लंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येअक्रंददग्निस्तनयंनिवद्यौरघापथानःपितरः

परासइत्याहुतिंवाहवनीयेजुहुयादग्नयेक्षामवतेस्वाहेतिसातत्रप्रायश्चित्तिः॥
॥६॥ अथतदाहुर्यस्याग्नयोग्राम्येणाग्निनासंदह्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेसं
वर्गायाष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येकुविदंगनोगविष्टयेमानोअ
स्मिन्महाधनइत्याहुतिंवाहवनीयेजुहुयादग्नयेसंवर्गायस्वाहेतिसातत्रप्राय
श्चित्तिस्तदाहुर्यस्याग्नयोदिव्येनाग्निनासंसृज्येरन्कातत्रप्रायश्चित्तिरितिसोग्नये
प्सुमतेष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येअप्स्वग्नेसधिष्टवमयोदधेमे
धिरःपृतदक्षइत्याहुतिंवाहवनीयेजुहुयादग्नयेप्सुमतेस्वाहेतिसातत्रप्राय

श्चित्तिस्सदा कुर्यस्याग्नयः शाला अग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्न
ये शुचये ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्निः शुचिव्रततम
उदग्नेः शुचयस्तवे त्याहुतिं वाहवनीये जुहुयादग्नये शुचये स्वाहेति सा तत्र प्रा
॥६॥ यश्चित्तिस्सदा कुर्यस्याग्नय आरण्येनाग्निना संदह्येरन्का तत्र प्रायश्चित्तिरिति समेवा ॥६॥
रोपयेदरणी वोल्मुकं वा मोक्षयेद्यद्याहवनीयाद्यदि गार्हपत्याद्यदि न शक्नुया
त्सोऽग्नये संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये आहुतिं वा कै२
हवनीये जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्तिः॥७॥ ७॥ तदा कुर्य

आहिताग्निरुपवसथेऽश्नुकु। नीत का तत्र प्रायश्चित्तिरिति सोऽग्नये व्रतभृते ष्टाकपा
लं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतभृच्छुचिर्व्रतानि बिभ्रद्व्रतपा अ
दब्ध इत्याहुतिं वाहवनीये जुहुयादग्नये व्रतभृते स्वाहेति सा तत्र प्रायश्चित्तिस्स
दा कुर्ये आहिताग्निरुपवसथे व्रत्यमापद्येत का तत्र प्रायश्चित्तिरिति सोऽग्नये व्रतप
तयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतपा असि॥ यद्वो वयं प्रमि
नाम व्रतानीत्याहुतिं वाहवनीये जुहुयादग्नये व्रतपतये स्वाहेति सा तत्र प्रायश्चित्ति
स्तदा कुर्ये आहिताग्निरमावास्यां पौर्णमासीं वातीयात्का तत्र प्रायश्चित्तिरिति सोऽग्न
ये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये वेत्था हि वेधो अध्वनः

देवानामपिपंथामगन्मेत्याहुतिंवाहवनीयेजुहुयादग्नयेपथिकृतेस्वाहेतिसातत्रप्राय
श्चित्तिस्तदाहुर्यस्यसर्वएवाग्नयउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसोऽग्नयेतपस्व
तेजनद्वतेपावकवतेऽष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येआयाहितप
साजनेष्वानोयाहितपसाजनेष्वित्याहुतिंवाहवनीयेजुहुयादग्नयेतपस्वतेजनद्वतेपावक ॥७॥
॥७॥ वतेस्वाहेतिसातत्रप्रायश्चित्तिः॥८॥७॥तदाहुर्यआहिताग्निराग्रयणेनानिष्ट्वानवान्नं
प्राश्नीयात्कातत्रप्रायश्चित्तिरितिसोऽग्नयेवैश्वानरायद्वादशकपालंपुरोडाशंनिर्वपे
त्तस्ययाज्यानुवाक्येवैश्वानरोअजीजनत्पृष्टोदिविपृष्टोअग्निःपृथिव्यामित्याहुतिंवा

हवनीयेजुहुयादग्नयेवैश्वानरायस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्नि
र्यदिकपालंनश्येत्कातत्रप्रायश्चित्तिरितिसोऽश्विभ्यांद्विकपालंपुरोडाशंनिर्वपेत्त
स्ययाज्यानुवाक्येअश्विनावर्तिरस्मदागोमतानासत्यारथेनेत्याहुतिंवाहवनी
येजुहुयादश्विभ्यांस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निर्यदिपवित्रंनश्ये
त्कातत्रप्रायश्चित्तिरितिसोऽग्नयेपवित्रवतेऽष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानु
वाक्येपवित्रंतेविततंब्रह्मणस्पतेतपोष्पवित्रंविततंदिवस्पदइत्याहुतिंवाह
नीयेजुहुयादग्नयेपवित्रवतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निर्यदि

हिरण्यं नश्येत्का तत्र प्रायश्चित्तिरिति सोऽग्नये हिरण्यवतेऽष्टाकपालं पुरोडाशं निर्व
पेत्तस्य याज्यानुवाक्ये हिरण्यकेशो रजसो विसारेऽआ ते सुपर्णा अमिनन्तँ एवैरि
त्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति सा तत्र प्रायश्चित्तिः स्यादा
हुर्यऽआहिताग्निर्यदि प्रातरस्नातोऽग्निहोत्रं जुहुयात्का तत्र प्रायश्चित्तिरिति सो
॥८॥ ऽग्नये वरुणायाष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वं नोऽअग्ने वरुण ॥८॥
स्य विद्वान्स त्वं नोऽअग्नेवमो भवोतीत्याहुतिं वाहवनीये जुहुयादग्नये वरुणाय
स्वाहेति सा तत्र प्रायश्चित्तिः स्यादाहुर्यऽआहिताग्निर्यदि सूतकान्नं प्राश्नीयात्का त
त्र प्रायश्चित्तिरिति सोऽग्नये तन्तुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवा

क्ये तंतुं तन्वन्रजसो भानुमन्विह्यक्षानहो नह्यतनोत सोम्य इत्याहुतिं वाहव
नीये जुहुयादग्नये तन्तुमते स्वाहेति सा तत्र प्रायश्चित्तिः स्यादाहुर्यऽआहिताग्निर्जी
वेमृत राच्छ्रुत्वा का तत्र प्रायश्चित्तिरिति सोऽग्नये सुरभिमतेऽष्टाकपालं पुरोडाशं नि
र्वपेत्तस्य याज्यानुवाक्ये अग्निर्होता न्यसीदद्यजीयान्साध्वीमकर्देववीतिं नो अद्ये त्या
हुतिं वाहवनीये जुहुयादग्नये सुरभिमते स्वाहेति सा तत्र प्रायश्चित्तिः स्यादाहुर्यऽआ
हिताग्निर्यस्य नार्यो गावो यमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोऽग्नये मरुत्वते त्र
योदशकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षयेऽराऽइवेदच
रमाऽअहेवेत्याहुतिं वाहवनीये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चि

त्तिस्तदाहुरपत्नीकोप्यग्निहोत्रमाहरेत् ३ ना हरेत् ३ इति आहरेदित्याहुर्यदि नाहरे
दनद्धा पुरुषः [illegible] कोनद्धा पुरुष इति न देवान्न पितॄन्न मनुष्यानिति तस्मादप
त्नीकोप्यग्निहोत्रमाहरेत्तदेषाभियज्ञगाथा गीयते ॥ यज्ञे सौत्रामण्यामपत्नीकोप्यसो
मपः ॥ मातापितृभ्यामनृणार्थो यजेतेति वचनाच्छ्रुतिरितस्मात्सौम्यं याजयेत् ॥ ॥९॥ ७॥
॥९॥ तदाहुर्वीवापत्नीकोग्निहोत्रं कथमेवं जुहोतीति निविष्टं स्तापत्नी नष्टा वाग्निहोत्रं क ॥९॥
थमग्निहोत्रं जुहोतीति पुत्रान्पौत्रान्नप्तॄनित्याहुरस्मिंश्च लोकेमुष्मिंश्चास्मिंल्लोके यां
स्वर्गो स्वर्गेण स्वर्गं लोकमारुरोहेत्यमुष्येव लोकस्य संततिं धारयातीयस्यैषापत्नीन्नै

वेतस्मादपत्नीकस्याधानं कुर्वेत्सपत्नीकोग्निहोत्रं कथमग्निहोत्रं जुहोतिश्रद्धा पत्नी
सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं श्रद्धया सत्येन मिथुनेन स्वर्गाल्लोकाञ्ज
यतीति ॥१०॥७॥ तदाहुर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नं
ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति पूर्वां पौर्णमासीमुपवसेदिति पैग्यमुत्तरामि
ति कौषीतकं या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनी
वाली योत्तरा सा कुहूर्यां पर्यस्तमियादभ्युदियादिति सा तिथिः पूर्वां पौर्णमासीमुपव
सेदनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपैति यजन्ते तेन सोमं क्रीणन्तीति तेनोत्तरा
मुत्तरामुपवसेदुत्तराणि ह वै सोमा यजन्ते सोममन्वदैवतमेतद्देव सोमं यच्चन्द्रमा

स्तस्मादुत्तरामुपवसेत् ॥११॥७॥ तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदियात्प्रणीतो वा
प्राञ्चौ मधुपश्राम्येत्का तत्र प्रायश्चित्तिरिति हिरण्यं पुरस्कृत्य सायमुद्धरेज्ज्योतिर्वै शु
क्रं हिरण्यं ज्योतिः शुक्रमसौ तदेव तज्ज्योतिः शुक्रं पश्यन्नुद्धरति रजतमंतर्धाय प्रातरुद्ध
रेदेतद्वा रात्रिरूपं पुरा संज्ञे हाद्धा यमानाहवनीयमुद्धरेन्मृत्युर्वै तमश्छाया तेनैव तज्ज्यो
॥१०॥ तिषा मृत्युं तमश्छायां तरति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य गार्हपत्याहवनीयावंतरेणा ॥१०॥
नो वा रथो वा श्वा वा प्रतिपद्येत का तत्र प्रायश्चित्तिरिति नैनन्मनसि कुर्यादित्याहुरात्मन्यस्य
हिता भवंतीति तद्वेन्मनसि कुर्वीत गार्हपत्यादविच्छिन्नामुदकधारां हरेत्तंतुं तन्वन्रज

सो भानुमन्वीहीत्याहवनीयात्सा तत्र प्रायश्चित्तिस्तदाहुः कथमग्नीनन्वादधानोन्वा
हार्यपचनमाहारयेत् ॥ नाहारयेद् इति ॥ आहारयेदित्याहुः प्राणान्वा एषोभ्यात्मंध
त्तेयोग्नीनाधत्ते तेषामेषोन्नादतमो भवति यदन्वाहार्यपचनस्तस्मिन्नेतामाहुतिंजु
होत्यग्नयेन्नादायान्नपतये स्वाहेत्यन्नादो [illegible] हान्नपतिर्भवत्यश्नुते प्रजयान्ना
द्यं य एवं वेदांतरेण गार्हपत्याहवनीयौ होष्यन्संवरेत्तेन हवा एनं संवरमाण
मग्नयो विदुरयमस्मासु होष्यतीत्येतेन हवा अस्य संवरमाणस्य गार्हपत्याह
वनीयौ पाप्मानमपहतः सोपहतपाप्मोर्ध्वः स्वर्गं लोकमेतीति वै ब्राह्मणमुदाह
रंति तदाहुः कथमग्नीन्प्रवत्स्यन्नुपतिष्ठेत प्रोष्य वा प्रत्येत्याहरहरवा [illegible] दिद्धीमि

त्या हुस्तृच्छ्री वैश्रेयस ऽआकांक्षं ते थाध्या हुरहरहर्वा एते यजमानस्या श्रद्धयोदा
सनाश्रिप्साव ना छिद्यति तान्नुपतिष्ठते वा मयं वा मयं मे स्त्विच्त्यभयं ह वा अस्मै न
व त्यभयं हैवास्मै भवति ॥१२॥ ॥इति सप्तमपंचिके द्वितीयोऽध्यायः ॥२॥ श्रीगणेश
॥७॥ हरिश्चंद्रो ह वैध स ऐक्ष्वाको राजा पुत्र ऽआस तस्य ह शतं जाया बभूवुस्तासु पु
॥११॥ त्रं न लेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रछ यन्न्विमं पुत्रमिछंति ये वि ॥११॥
जानंति ये च न ॥ किं स्वित्पुत्रेण विंदते तन्म ऽआचक्ष्व नारदेति स ऽएकया पृष्टो दश
भिः प्रत्युवाच ॥ ऋणमस्मिन्त्संनयत्यमृतत्वं च गच्छति ॥ पिता पुत्रस्य जातस्य पश्येच्चेज्जी
वतो मुखं ॥ यावंतः पृथिव्यां भोगा यावंतो जातवेदसि ॥ यावंतो ऽअप्सु प्राणिनां भूयान्पु

त्रे पितुस्ततः ॥ शश्वत्पुत्रेण पितरो त्यायन्बहुलं तमः ॥ आत्मा हि जज्ञ ऽआत्मनः स इरा
वत्यतितारिणी ॥ किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः ॥ पुत्रं ब्रह्माण इछध्वं
स वै लोको वदावदः ॥ अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहः ॥ स
खा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन् ॥ पतिर्जायां प्रविशति गर्भो भू
त्वा स मातरं ॥ तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥ तज्जाया जाया भवति यदस्यां
जायते पुनः ॥ आभूतिरेषाभूतिर्बीजमेतन्निधीयते ॥ देवाश्चैतामृषयश्च तेजः स
मभरन्महत् ॥ देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः ॥ नापुत्रस्य लोको स्तीति
तत्सर्वे पशवो विदुः ॥ तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति ॥ एष पंथा उरुगा

न वरुणं २

यःसुतेनायंपुत्रिणऽआ क्रमंतेविशोकाः॥ तंपश्यंतिपशवोवयांसिचतस्मात्ते
मात्रापिमिथुनीभवंतीतिहस्माऽऽख्याय॥१३॥७॥ अथैमुवाचराजानमुपधाव
॥१२॥ पुत्रोमेजायतांतेनत्वायजाइतितथेतिसवरुणंराजानमुपससारपुत्रोमेजायतां
तेनत्वायजाइतितथेतितस्यहपुत्रोजज्ञेरोहितोनामतंहोवाचाजनिवैतेपुत्रोय ॥१२॥
जस्वमानेनेतिसहोवाचयदावैपशुर्निर्दशोभवत्यथसमेध्योभवतिनिर्दशोन्व
स्त्वथत्वायजाइतितथेतिसहनिर्दशऽआसतंहोवाचनिर्दशोन्वभूद्यजस्वमा
नेनेतिसहोवाचयदावैपशोर्दंताजायंतेथसमेध्योभवतिदंतान्वस्यजायंतां
मथत्वायजाइतितथेतितस्यहदंताजज्ञिरेतंहोवाचाज्ञतवाऽअस्यदंता

यजस्वमानेनेतिसहोवाचयदावैपशोर्दंताःपद्यंतेथसमेध्योभवतिदंतान्वस्यप
द्यंतामथत्वायजाइतितथेतितस्यहदंताःपेदिरेतंहोवाचापत्सतवाऽअस्यदंतायज
स्वमानेनेतिसहोवाचयदावैपशोर्दंताःपुनर्जायंतेथसमेध्योभवतिदंतान्वस्यजायंताम पुन
थत्वायजाइतितथेतितस्यहदंताःपुनर्जज्ञिरेतंहोवाचाज्ञतवाऽअस्यपुनर्दंतायजस्व
मानेनेतिसहोवाचयदावैक्षत्रियःसान्नाहुकोभवत्यथसमेध्योभवतिसन्नाहंनुप्राप्नो
त्वथत्वायजाइतितथेतिसहसंनाहंप्रापतंहोवाचसंनाहंनुप्राप्नोद्यजस्वमानेनेति
सतथेत्युक्त्वापुत्रमामंत्रयामासततायंवैमह्यंत्वामददाद्धंतत्वयाहमिमंयजाइतिसहने
त्युक्त्वाधनुरादायारण्यमपातस्थौससंवत्सरमरण्येचचार॥१४॥७॥अथहैक्ष्वाकंवरु
णोजग्राहतस्यहोदरंजज्ञेतदुहरोहितःशुश्रावसोऽरण्याद्ग्राममेयायतमिंद्रःपुरुषरू

पेणपर्येत्योवाच ॥नानाश्रांताय श्रीरस्तीति रोहित शुश्रुम ॥पापो नृषद्वरो जन इंद्र इच्चरतः
सखा चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥द्वितीयं संवत्सरमरण्ये चचार सो
रण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फ
लग्रहिः ॥शेरेस्य सर्वे पाप्मानः श्रमेण प्र पथे हताश्चरैवेति चरैवेति वै मा ब्राह्मणो वो
॥१२ चदिति ह ॥तृतीयं संवत्सरमरण्ये चचार सो रण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण प ॥१२
र्येत्योवाच ॥आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ॥शेते निपद्यमानस्य चराति
चरतो भगश्चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥चतुर्थं संवत्सरमरण्ये चचा
र सो रण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥कलिः शयानो भवति सं

जिहानस्तु द्वापरः ॥उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो
वोचदिति ह ॥पंचमं संवत्सरमरण्ये चचार सो रण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवा
च ॥चरन्वै मधु विंदति चरन्स्वादुमुदुंबरं ॥सूर्यस्य पश्य श्रेमाणं यो न तंद्रयते चरंश्चरैवेति
चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥षष्ठं संवत्सरमरण्ये चचार सो रण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥चरैवेति
चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥सप्तमं संवत्सरमरण्ये चचार सो
जीगर्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय तस्य ह त्रयः पुत्रा आ
सुः शुनःपुच्छः शुनःशेपः शुनोलांगूल इति तं होवाच ऋषे हं ते शतं ददाम्यहमेषामे
केनात्मानं निष्क्रीण इति स ज्येष्ठं पुत्रं निगृह्णान उवाच न न्विममिति नो एवेममिति
कनिष्ठं माता तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे तस्य ह शतं दत्वा स तमादाय सो र
ण्याद्ग्राममेयाय स पितरमेत्योवाच तत हंताहमनेनात्मानं निष्क्रीण इति स वरुणं

राजानमुपससार नेनं त्वा यजा इति तथेति भूयान्वै ब्राह्मणः क्षत्रियादिति वरुण उवा
च तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच तमेतमभिषेचनीये पुरुषं पशुमालेभे ॥१५॥६॥
तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मायास्य उद्गाता तस्मा उपाकृ
॥१४॥ ताय नियोक्तारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताह ॥१४॥
मेनं नियोक्ष्यामीति तस्मा अपरं शतं ददुस्तं स निनियोज तस्मा उपाकृताय नियुक्तायाप्री
ताय पर्यग्निकृताय विशसितारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं द
त्ताहमेनं विशसिष्यामीति तस्मा अपरं शतं ददुः सोऽसिं निःश्यान एयायाथ ह शुनः
शेप ईक्षांचक्रे मानुषमिव वै मा विशसिष्यंति हंताहं देवता उपधावामीति स प्रजाप

तिमेव प्रथमं देवतानामुपससार कस्य नूनं कतमस्यामृतानामित्येतयर्चा तं प्रजापतिरुवाचा
ग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा त
मग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव सवि
तरित्येतेन तृचेन तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति स वरुणं राजान
मुपससारात उत्तराभिरेकत्रिंशता तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वो
त्स्रक्ष्याम इति सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या तमग्निरुवाच विश्वान्नु देवान्स्तुह्यथ त्वो
त्स्रक्ष्याम इति स विश्वान्देवांस्तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा तं विश्वे देवा
ऊचुरिंद्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति
स इंद्रं तुष्टाव यच्चिद्धि सत्य सोमपा इत्येतेन सूक्तेनोत्तरस्य च पंचदशभिस्तस्मा इंद्रस्तु

यमनः प्रीतो मनसा हिरण्मयं रथं ददौ तमेतया प्रतीयाय शश्वदिंद्र इति तमिंद्र उवाचाश्विनौ नु स्तु
ह्यथ त्वोत्स्रक्ष्याम इति सोऽश्विनौ तुष्टावात उत्तरेण तृचेन तमश्विनावूचतुरुषसं नु स्तुह्यथ त्वोत्स
क्ष्याम इति स उषसं तुष्टावात उत्तरेण तृचेन तस्य ह स्मर्च्यृच्युक्तायां विपाशो मुमुचे कनीय ऐक्ष्वा
कस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां विपाशो मुमुचेऽगद ऐक्ष्वाक आस ॥१६॥ तमृत्विज
॥१५॥ ऊचुस्त्वमेव नोऽस्याह्नः संस्थामधिगच्छेत्यथ ह तं शुनःशेपोंजःसवं ददर्श तमेताभिश्चतसृभि
रभिसुषाव यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलशमभ्यवनिनाय उच्छिष्टं चम्वोर्भ ॥१५॥
रेत्येतयर्चाथास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवांचकारा
थैनमवभृथमभ्यवनिनाय त्वं नोऽग्ने वरुणस्य विद्वानित्येताभ्यामथैनमत ऊर्ध्वमग्नि तर
माहवनीयमुपस्थापयांचकार शुनश्चिच्छेपं निदितं सहस्रादित्यथ ह शुनःशेपो वि

श्वामित्रस्यांकमाससाद स होवाचाजीगर्तः सौयवसिरृषे पुनर्मे पुत्रं देहीति नेति होवाच विश्वा
मित्रो देवा वा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्र
वाः स होवाचाजीगर्तः सौयवसिस्त्वं वेहि विह्वयावहा इति स होवाचाजीगर्तः सौयवसिराङ्गि
रसो जन्मनास्याजीगर्तिः श्रुतः कविः ॥ ऋषे पैतामहात्तंतोर्मापगाः पुनरेहि मामिति स हो
वाच शुनःशेपोऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत ॥ गवां त्रीणि शतानि त्वमवृणी
था मदंगिर इति स होवाचाजीगर्तः सौयवसिस्तद्वै मा तात तपति पापं कर्म मया कृतं
तदहं निह्नुवे तुभ्यं प्रतियंतु शता गवामिति स होवाच शुनःशेपो यः सकृत्पापकं कुर्या
त्कुर्यादेनत्ततोऽपरं ॥ नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतमित्यसंधेयमिति ह ति
विश्वामित्र उपपाद स होवाच विश्वामित्रो भीम एव सौयवसिः शासेन विशिशासि

प

षुः। अस्थान्मे तस्य पुत्रो भूर्मे मैवोपेहि पुत्रतामिति स होवाच शुनःशेपः स वै यथा नो
ज्ञपया राजपुत्र तथा वद ॥ यथैवांगिरसः सन्नुपेयां तव पुत्रतामिति स होवाच विश्वामित्रो
ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात् ॥ उपेया दैवं मे दायं तेन वै त्वोपमंत्रय इ
ति स होवाच शुनःशेपः संज्ञानानेषु वै ब्रूयात् सौहार्द्याय मे श्रियै यथाहं भरतऽऋषभो
॥१८॥ पेयां तव पुत्रतामित्यथ ह विश्वामित्रः पुत्रानामंत्रयामास मधुच्छंदाः शृणोतनऽ
ऋषभो रेणुरष्टकः ॥ ये के च भ्रातरस्थनाऽस्मै ज्यैष्ठ्याय कल्पध्वमिति ॥१७॥ तस्य ह वि ॥१८॥
श्वामित्रस्यैकशतं पुत्राऽआसुः पंचाशदेव ज्यायांसो मधुच्छंदसः पंचाशत्कनीयांसस्तद्ये
ज्यायांसो न ते कुशलं मेनिरे ताननुव्याजहारांतान्वः प्रजा भक्षीष्टेति तऽएते [illegible]

४

ध्राः पुंड्राः शबराः पुलिंदा मूतिबा इत्युदंत्या बहवो भवंति वैश्वामित्रा दस्यूनां भूयिष्ठाः
स होवाच मधुच्छंदाः पंचाशता सार्धं यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयं ॥ पुरस्त्वा
सर्वे कुर्महे त्वामन्वंचो वयं स्मसीत्यथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव ते वै पुत्राः पशु
मंतो वीरवंतो भविष्यथ ॥ ये मानं मेनुगृह्णंतो वीरवं[illegible]तमकर्त्त मा पुरऽए
त्रा वीरवंतो देवरातेन गाथिनाः। सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनं ॥ एष वः कु
शिका वीरो देवरातस्तमन्वित ॥ युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि ॥ ते स
म्यंचो वैश्वामित्राः सर्वे साकं सरातयः ॥ देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः ॥
अधीयत देवरातो रिक्थयोरुभयोरृषिः ॥ जन्हूनां चाधिपत्ये दैवे वेदे च गाथिनां ॥
तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेभिषिक्तायाचष्टे हिरण्यक

शिपावासीनऽआचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति यशो वै हिरण्यं यशसैवैनं त
त्समर्धयति त्योमित्यृचः प्रतिगरएवं तथेति गाथायाऽओमिति वै दैवं तथेति मानुषं दे
१७ वेन चैवैनं तन्मानुषेण च पापादेनसः प्रमुंचति तस्माद्यो राजा विजिती स्यादप्ययज १७
मानऽआख्यापयेतैव तच्छौनःशेपमाख्यानं न हास्मिन्नल्पं चनैनः परिशिष्यते स
हस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रऽएते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्र
कामा हाप्याख्यापयेरंल्लभंते ह पुत्रांल्लभंते ह पुत्रान् ॥१८॥ इति सप्तमपंचिके तृती
योध्यायः ॥ छ ॥ छ ॥ छ ॥ छ ॥ शुभं भवतु ॥ प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मक्षत्रेऽअ
सृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजाऽअसृज्यंत हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्ष

मन्वहुताद एता वै प्रजा हुतादो यद्ब्राह्मणा अथैता अहुतादो यद्राजन्यो वैश्यः
शूद्रस्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्षत्रे अन्वैतां यान्येव ब्रह्मणऽआयुधानि तैर्ब्र
ह्मान्वैद्यानि क्षत्रस्य तैः क्षत्रमेतानि वै ब्रह्मण आयुधानि यद्यज्ञायुधान्यथैता
नि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व तं क्षत्रमनन्वाप्य न्यवर्ततायुधेभ्यो ह
स्मास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्तमाप्नोत्तमाप्त्वा परस्तान्निरुध्यातिष्ठत्स
आप्तः परस्तान्निरुद्धस्तिष्ठं ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्तत तस्माद्धाप्येत
र्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितोथैनत्क्षत्रमन्वागच्छत्तदब्रवीदुप मास्मि
न्यज्ञे ह्वयस्वेति तत्तथेत्यब्रवीत्तद्वै निधाय स्वान्यायुधानि ब्रह्मणएवायुधैर्ब्र

ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तस्वेति तथेति तत्क्षत्रं निचाय्य स्वान्यायुधा
नि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तत तस्मादप्येत
र्हि क्षत्रियो यजमानो निचाय्यैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रू
१० पेण ब्रह्म भूत्वा यज्ञमुपावर्त्तते ॥१९॥ अथातो देवयजनस्यैव याच्ञा स तदाहुर्यद्ब्रा १०
ह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं याचति कं क्षत्रियो याचेदिति
दैवं क्षत्रं याचेदित्याहुरादित्यो वै दैवं क्षत्रमादित्य एषां भूतानामधिपतिः स यदहर्दी
क्षिष्यमाणो भवति तदहः पूर्वाह्ण एवोद्यन्तमादित्यमुपतिष्ठेतेदं श्रेष्ठं ज्योति

षां ज्योतिरुत्तमं ॥ देवसवितर्देवयजनं मे देहि देवयज्यायाइति देवयजनं याचेत्स यत्तत्र
याचित उत्तरां सर्पत्योंतथा ददामीति कल्याणं तदाहुस्तस्य ह न काचन रिष्टिर्भवति दे
वेन सवित्रा प्रसूतस्योत्तरोत्तरिणीं ह श्रियमश्नुतेऽश्नुते ह प्रजानामैश्वर्यमाधि
पत्यं य एवमुपस्थाय याचित्वा देवयजनमध्यवसाय दीक्षते क्षत्रियः सन् ॥२०॥
अथात इष्टापूर्त्तस्यापज्यानिः क्षत्रियस्य यजमानस्य स पुरस्ताद्दीक्षाया आकूतिं जुहु
याच्चतुर्गृहीतमाज्यमाहवनीय इष्टापूर्तस्यापरिज्यान्यै पुनर्न इन्द्रो मघवा ददा
तु ॥ ब्रह्म पुनरिष्टं पूर्त्तं दात्स्वाहेत्यथानूबंध्यायै समिष्टयजुषामुपरिष्टात्पुनर्नो

१८ अग्निर्जातवेदाददातु॥क्षत्रंपुनरिष्टापूर्तंदास्वाहेतिसेष्टापूर्तस्यापरिज्यानिःक्ष १८
त्रियस्ययजमानस्ययदेतआकुतीतस्मादेतेहोतव्ये॥२१॥तदुहस्माहसौजात
आराढिरजीतपुनर्वण्यंवाएतद्यदेतेआकुतीइतियथाहकामयेततथैतेकुर्याद्य
इतोनुशासनंकुर्यादितीमेएवजुहुयाद्ब्रह्मप्रपद्येब्रह्ममाक्षत्राद्गोपायत्वब्रह्मणे
स्वाहेतितत्तदितीं२ब्रह्मवाएषप्रपद्यतेयोयज्ञंप्रपद्यतेब्रह्मवैयज्ञोयज्ञाउह्वा
एषपुनर्जायत्तेतंब्रह्मप्रपन्नंसत्क्षत्रंनपरिजिनातिब्रह्ममाक्षत्राद्गोपायत्वित्याह
यथैनंब्रह्मक्षत्राद्गोपायेद्ब्रह्मणेस्वाहेतितदेनत्प्रीणातितदेनत्प्रीतंक्षत्राद्गो

पायत्यथानुवैव्याचैसमिष्टयजुषामुपरिष्टात्क्षत्रंप्रपद्येक्षत्रंमाब्रह्मणोगोपायतुक्षत्रा
यस्वाहेतितत्तदितीं२क्षत्रंवाएषप्रपद्यतेयोराष्ट्रंप्रपद्यतेक्षत्रंहिराष्ट्रंतंक्षत्रंप्रपन्नंब्रह्म
नपरिनातिक्षत्रंमाब्रह्मणोगोयात्वित्याहयथैनंक्षत्रंब्रह्मणोगोपायेत्क्षत्रायस्वाहेति
तदेनत्प्रीणातितदेनत्प्रीतंब्रह्मणोगोपायतिसेष्टापूर्तस्यैवापरिज्यानिःक्षत्रि
यस्ययजमानस्ययदेतेआकुतीतस्मादेतेएवहोतव्ये॥२२॥अथैंद्रोवैदेव
तयाक्षत्रियोभवतित्रैष्टुभश्छंदसापंचदशस्तोमेनसामोराज्येनराजन्योबंधु दा
नासहदीक्षमाणएवंब्राह्मणतामभ्युपैतियत्कृष्णाजिनमध्यूहतियद्दीक्षि

२० नवृतं नरति यदेनं ब्राह्मणा अभिसंगच्छंते ऽस्य ह दीक्षमाणस्यैंद्र एवेंद्रियमादत्ते त्रिष्टुब्वी २०
र्यं पंचदशः स्तोम आयुः सोमो राज्यं पितरो यशस्कीर्तिमन्यो वा अयमस्मद्भवति ब्रह्म वा
अयं भवति ब्रह्म वा अयमुपावर्त्तत इति वदंतः स पुरस्ताद्दीक्षाया आकूतिं हुत्वाहवनीय
मुपतिष्ठेत नेंद्राद्देवताया एमि न त्रिष्टुभश्छंदसो न पंचदशात्स्तोमान्न सोमाद्राज्ञो न
पितृभ्यो मा म इंद्र इंद्रियमादित मा त्रिष्टुब्वीर्यं मा पंचदशः स्तोम आयुर्मा सोमो
राज्यं मा पितरो यशस्कीर्तिं सहेंद्रियेण वीर्येणायुषा राज्येन यशसा बंधुनाग्निं
देवतामुपैमि गायत्रीं छंदस्त्रिवृतं स्तोमं सोमं राजानं ब्रह्म प्रपद्ये ब्राह्मणो भवा

मीति तस्य ह नेंद्र इंद्रियमादत्ते न त्रिष्टुब्वीर्यं न पंचदशः स्तोम आयुर्न सोमो राज्यं न पि
तरो यशस्कीर्तिं य एवमेतामाकूतिं हुत्वाहवनीयमुपस्थाय दीक्षते क्षत्रियः सन् ॥
॥२३॥ अथातो यो वै देवतया क्षत्रियो दीक्षितो भवति गायत्र्या छंदसा त्रिवृता स्तोमेन ब्राह्मणो
वै बंधुना स ह त्वेवं न क्षत्रियताम भ्युपैति तस्य ह देवस्य ततो ऽग्निरेव तेज आदत्ते
गायत्री वीर्यं त्रिवृत्स्तोम आयुर्ब्राह्मणा ब्रह्म यशस्कीर्तिमन्यो वा अयमस्म
द्भवति क्षत्रं वा अयं भवति क्षत्रं वा अयमुपावर्त्तत इति वदंतः सो ऽन्तरं ध्यायेत स
मिष्टयजुषामुपरिष्टाद्धुत्वाकूतिमाहवनीयमुपतिष्ठेत नाग्नेर्देवताया एमि

२२ नगायत्र्या छंदसा न त्रिवृता स्तोमेन वसवो ब्रह्मणो मामग्निस्तेन आदित मा गायत्री २२
वीर्यमा त्रिवृत्स्तोम आयुर्मा ब्राह्मणा ब्रह्मयशसं कीर्त्तिं सह तेजसा वीर्येणायुषा ब्रह्म
णा यशसा कीर्त्यैंद्रं देवतामुपैमि त्रिष्टुभं छंदः पंचदशं स्तोमं सोमं राजानं क्षत्रं प्रपद्ये क्षत्रि
यो मा ग्नि दिवाः पितरः पितरो देवा यो स्मि स सन्यजे। स्वं मइष्टं स्वं दत्तं स्वं श्रौतं स्वं कु
तौ तस्य मे यमग्निरुपद्रष्टायं वायुरुपश्रोता सा वादित्योनुख्याता तेदमहं य एवास्मि सोस्मी
ति तस्य हुनाग्निस्तेज आदत्ते नगायत्री वीर्यं न त्रिवृत्स्तोम आयुर्न ब्राह्मणा ब्रह्मयशस्की
र्त्तिं य एवमेतामाकूतिं उत्थाहवनीयमुपस्थायोदवस्यति क्षत्रियः सन् ॥२४॥

अथातो दीक्षाया आवेदनस्यैव तदाहुर्यद्ब्राह्मणस्य दीक्षितस्य
ब्राह्मणो दीक्षिष्टेति कथं क्षत्रियस्यावेदयेदिति यथैवैतद् ब्राह्म
णस्य दीक्षितस्य ब्राह्मणो दीक्षिष्टेति। दीक्षामावेदयंत्येवमेवैत
त्क्षत्रियस्यावेदयेत्पुरोहितस्यार्षेयेणेति तद्धि तीउनीथायना
एषस्मान्न्ययुर्यानि ब्रह्मणा एवायुधैर्ब्राह्मणो रूपेणाब्रह्म
न्नायज्ञमुपावर्त्तते तस्मात्तस्यापुरोहितस्यार्षेयेणा दीक्षामावे
दयेत्पुः; पन्नोहितस्यार्षेयेणा प्रवरं प्रवृणीरन् ॥२५॥ अथातो
यज्ञतन्त्रागस्यैन तदाहुर्प्राश्नीयात्क्षत्रीयो यजमानभागं जग्ध्वा अग्नी
याह्वमिति यत्र श्रीयाहूतायां

ह्मणःप्राश्नीयाद्यदाश्नामंतरियाद्यज्ञोवैयजमानभागःसब्रह्मणेपरिहृत्यःपुरोहितायत
२२ नंवाएतत्क्षत्रियस्ययद्ब्रह्मार्धात्मोहवाएषक्षत्रियस्ययत्पुरोहितस्तउपाहृत्यपरोक्षेणैवास्यप्र २२
त्यक्षरूपमाप्नोतिनास्यप्रत्यक्षंभक्षितोभवतियज्ञउहवाएषप्रत्यक्षंयद्ब्रह्माब्रह्मणि
हिसर्वोयज्ञःप्रतिष्ठितोयज्ञोयजमानोयज्ञएवतद्यज्ञमप्यवसृजतियथाप्स्वापोयथा
ग्नावग्निंतद्वैनातिरिच्यतेतदेनंनहिनस्तितस्मात्स्यब्रह्मणेपरिहृत्योग्नौहैदे
जुहुतिप्रजापतेर्विमानामुलोकस्तस्मिंस्त्वादधामिसहयजमानेस्वाहेतितत्तथा
नकुर्याद्यजमानोवैयजमानभागोयजमानंहसोग्नौप्रवृणक्तियएनंतत्रब्रू
याद्यजमानमग्नौप्रावाक्षीदस्याग्निःप्राणंधक्ष्यतिमरिष्यतियजमानइ

तिरोऽथतथास्यात्तस्मात्तस्याशान्नेयादाशान्नेयात् ॥२६॥ इतिसप्तमपंचिकेचतुर्थोध्या
यः॥ ७ ॥ ४ ॥ विश्वंतरोहसौषद्मनःश्यापर्णान्परिचक्षाणोविश्यापर्णंयज्ञमाजह्रेतद्धानुबु
ध्यश्यापर्णास्तंयज्ञमाजग्मुस्तेहतदंतर्वेद्यासांचक्रिरेतान्हदृष्ट्वोवाचपापस्यवा
इमेकर्मणःकर्तारआसतेपूतायैवाचोवदितारोयच्छ्यापर्णाइमानुत्थापयंतमेमे
तर्वेदिमासिषतेतितथेतितान्[illegible]नुत्थापयांचक्रुस्तेहोत्थाप्यमानारुरुविरेये
तेभ्योभूतवीरेभ्योसितमृगाःकश्यपानांसोमपीथमभिजिग्युःपारिक्षितस्य
जनमेजयस्यविकश्यपेयज्ञेतेतत्रवीरवंतआसुःकस्वित्सोस्माकमस्ति

वीरो यदिमं सोमपाथमसि मंजेष्यती सयमहमस्मि वो वीर इति होवाच रामो मार्गवे
यो रामो हास मार्गवेयोनूचानः श्यापर्णीयस्तेषां होत्तिष्ठतामुवाचापि नु राजन्नित्थं
विदं वेदेरुत्थापयंतीति यस्त्वं कथं वेत्थ ब्रह्मबंधवेति ॥२७॥ यत्रेंद्रं देवताः पर्यवृं
जन्विश्वरूपं त्वाष्ट्रमभ्यमंस्त वृत्रमस्तृत यतीन्सालावृकेभ्यः प्रादादरुर्मघा
न वचो बृहस्पतेः प्रत्यवधीदिति तत्रेंद्रः सोमपीथेन व्यार्ध्यतेंद्रस्यानु व्यृद्धिं क्ष
त्रं सोमपीथेन व्यार्ध्यतापींद्रः सोमे सोमपीथे भवत्त्वष्टुरामुष्य सोमं तदव्यदमेवा
द्याविक्षत्रं सोमपीथेन स यस्तं भक्षं विद्याद्यः क्षत्रस्य सोमपीथेन व्यृ
द्धस्य येन क्षत्रं समृध्यते कथं तं वेदेरुत्थापयंतीति वेत्थ ब्राह्मण त्वं तं भ
क्षां वेद ह्येति तं वै नो ब्राह्मण ब्रूहीति तस्मा एतद्राजन्निति होवाच ॥२८॥ त्रयाणां
भक्षाणामेकमाहरिष्यंति सोमं वा दधि वापो वा स यदि सोमं ब्राह्मणानां स भक्षो
ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ब्राह्मणकल्पस्ते प्रजायामाजनिष्यत आदा
य्यापाय्यावसायी यथाकामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति ब्राह्मण
कल्पोस्य प्रजायामाजायत ईश्वरो हास्माद्द्वितीयो वा तृतीयो वा ब्राह्मण
तामभ्युपैतोः स ब्रह्मबंधवेन जिज्यूषितोथ यदि दधि वैश्यानां स भ
क्षो वैश्यांस्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजायामाजनि

२५

प्यतेऽन्यस्य बलिकृदन्यस्याद्यो यथाकामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति वैश्यक २६
ल्पोऽस्य प्रजायामाजायते ईश्वरो हास्माद्द्वितीयो वा तृतीयो वा वैश्यतामभ्युपेतोः स वैश्य
तया जिज्यूषितोऽथ यदपः शूद्राणां स भक्षः शूद्रांस्तेन भक्षेण जिन्विष्यसि शू
द्रकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो
यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजायते ईश्वरो हास्मा
द्द्वितीयो वा तृतीयो वा शूद्रतामभ्युपेतोः स शूद्रतया जिज्यूषितोः ॥२९॥
एते वै ते त्रयो भक्षा राजन्निति होवाच येषामाशां नेयात्क्षत्रियो यजमानोऽथास्यै

ष स्वो भक्षो न्यग्रोधस्यावरोधाश्च फलानि चौदुंबराण्याश्वत्थानि प्लाक्षाण्यभिषुणु
यात्तानि भक्षयेत्सोऽस्य स्वो भक्षो यत्र वा अदो देवा यज्ञेनेष्ट्वा स्वर्गं लोकमायंस्तत्रैतांश्च
मसान्न्युब्जंस्ते न्यग्रोधा अभवन्न्युब्जा इति हाप्येनानेतर्ह्याचक्षते कुरुक्षेत्रे ते ह प्र
थमजा न्यग्रोधानां तेभ्यो हान्येऽधिजातास्ते यन्न्यञ्चो रोहंस्तस्मान्न्यङ्रोहति न्यग्रो
हो न्यग्रोहो वै नाम तं न्यग्रोहं संतं न्यग्रोध इत्याचक्षते परोक्षेण परोक्षप्रिया
इव हि देवाः ॥३०॥ तेषां यश्चमसानां रसोऽवाङैत्तेऽवरोधा अभवन्य ऊर्ध्वस्तानि फला
न्येष ह वा क्षत्रियस्वाद्भक्षान्नैति यो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्युपा
ह परोक्षेणैव सोमपीथमाप्नोति नास्य प्रत्यक्षं भक्षितो भवति परोक्षमिव ह वा एष सो

॥

२५ मोराजायन्न्यग्रोधःपरोक्षमिवैषब्रह्मणोरूपमुपनिगच्छतियत्क्षत्रियःपुरोधयैवदीक्षयैव
प्रवरेणैवक्षत्रंवाएतद्वनस्पतीनांयन्न्यग्रोधःक्षत्रंराजन्योनिततइवहीहक्षत्रियोरा २५
ष्ट्रेवसन्भवतिप्रतिष्ठितइवनिततइवन्यग्रोधोवरोधैर्भूम्यांप्रतिष्ठितइवतद्यत्क्ष
त्रियोयजमानोन्यग्रोधस्यावरोधांश्चफलानिचभक्षयत्यात्मन्येवतत्क्षत्रंव
नस्पतीनांप्रतिष्ठापयतिक्षत्रआत्मानंक्षत्रेहवैसआत्मनिक्षत्रंवनस्पती
नांप्रतिष्ठापयतिन्यग्रोधइवावरोधैर्भूम्यांप्रतिराष्ट्रेतिष्ठत्युग्रंहास्यराष्ट्रमव्यथ्यं
भवतियएवमेतंभक्षंभक्षयतिक्षत्रियोयजमानः ॥३१॥ अथयदौदुंबराण्यूर्जो

वाएषोन्नाद्याद्वनस्पतिरजायतयदुदुंबरोभौज्यंवाएतद्वनस्पतीनामूर्जमेवास्मिंस्तदन्ना
द्यंभौज्यंचवनस्पतीनांक्षत्रेदधात्यथयदाश्वत्थानितेजसोवाएषवनस्पतिरजाय
तयदश्वत्थःसाम्राज्यंवाएतद्वनस्पतीनांतेजएवास्मिंस्तत्साम्राज्यंचवनस्पतीनां
क्षत्रेदधात्यथयत्प्लाक्षाणियशसोवाएषवनस्पतिरजायतयत्प्लक्षःस्वाराज्यं
चहवाएतद्वैराज्यंचवनस्पतीनांयशएवास्मिंस्तत्स्वाराज्यंवैराज्यंचवनस्पती
नांक्षत्रेदधात्येतान्यस्यपुरस्तादुपक्लृप्तानिभवंत्यथसोमंराजानंक्रीणीतिते
राज्ञएवावृतोपवसथ्यात्प्रतिवेशेश्वरंस्यथोपवसथ्यमहरेतान्यध्वर्युः
पुरस्तादुपकल्पयताधिषवणेचर्मोधिषवणफलकेद्रोणकलशंदशा

पवित्रमद्वान्स्तृतमं तं माध्यंदनीयं वस्थालीमुदंचने चमसांश्च तद्यदेतद्राजानं प्रातरग्नि
२६ षुण्वंति तदेनान्निर्द्धा विगृह्णीयाद भ्यन्यानि सुनुयान्माध्यंदिनायान्यानि परिशिं २६
ष्यात् ॥२२॥ तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं यजमान चमसमुन्नयेत्तस्मिंदेदर्भ
तरुणके प्रास्तोस्यातां तयोर्वषट्कृते तेन तः परिधि पूर्वे प्रास्येद्दधिक्राव्णो अकारिषमि
त्येतयर्चा स स्वाहाकारयानुवषट्कृते परप्राद् दधिक्राः शवसा पंच कृष्टीरिति तद्यत्रै
तांश्चमसानाहरेयुस्तदेतं यजमान चमसमाहरेत्तान्यत्रोऽऊह्णीयुस्तदेनमुपोऊह्णी
यात्तद्यदेव्होत्रोपह्वये तयदा चमसं भक्षयेदथैनमेतया भक्षयेद्यदत्र शिष्टं
रिनः सुतस्य यदिंद्रो अपिबच्छचीभिः ॥ इदं तस्य मनसा शिवेन सोमं राजानमि

ति शिवो हवा अस्मा एष वानस्पत्यः शिवेन मनसा भक्षितो भवत्यस्य राष्ट्रमव्यथ्यं भति
य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः शान्न एधि हृदे पीतः प्रण आयुर्जीवसे सोम तारीरित्या
भन्नः प्रलभि मर्शे ईश्वरो हन्नाएषोऽस्याभिमृष्टो मनुष्यस्यायुः प्रयवहर्त्तोरनईन्मा भक्ष
यतीति तद्यदेतेनाऽत्मानमभिमृशत्यायुरेव तत्प्रतिरत आप्यायस्व समेतु ते सं ते पयां
सि समुयंतु वाजा इति चमसमाप्याययंत्साभिरूपाभ्यां यद्यज्ञेऽभिरूपं तत्समृद्धं ॥२३॥
तद्यत्रैतांश्चमसान्सादयेयुस्तदेतं यजमान चमसं सादयेत्तान्यत्र प्रकंपयेयुस्तानम
नुप्रकंपयेदथैनमाहृतं भक्षयेन्नाराशंसपीतस्य देव सोम ते मतिविद ऊमैः पितृभि
र्भक्षितस्य भक्षयामीति प्रातःसवने नाराशंसो भक्षउ वैरिति माध्यंदिने काव्यै

रितितृतीयसवनं ह मा वै पितरः प्रातःसवनं कुर्वान्माध्यंदिने काव्यास्तृतीयसवने तदेतान्स्वे
२७ नैव तत्सवनभाजः करोति सर्वो देवस्सोमत इति ह स्माह प्रियव्रतः सोमापोयः केश्य २७
सवनभाजित्थमतारुवा अस्यादिनः सैः वनभाजो भवंत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति
य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः समानआसनः प्रत्यभिमर्शः समानमाप्या
यनं नमसस्य प्रातःसवनस्येवावृता प्रातःसवने नयंतुरे माध्यंदिनस्य माध्यंदिने तृ
तीयसवनस्य तृतीयसवने तमेवमेतं भक्षं प्रोवाच रामो मार्गवेयो विश्वंतराय सौषद्म
नाय तस्मिन्होवाच प्रोक्ते सहस्रमुह ब्राह्मण तुभ्यं दद्मः सश्यापर्ण उ मे यज्ञ इत्येतमु

हैव प्रोवाच तुरः कावषेयो जनमेजयाय पारिक्षिताय एतमु हैव प्रोक्तौ पर्वतनारदौ सोमका
य साहदेव्याय सहदेवाय सांर्जयाय बभ्रवे दैवावृधाय भीमाय वैदर्भाय नग्नजिते गां
धाराय एतमु हैव प्रोवाचाग्निः सनश्रुताय अरिंदमाय क्रतुविदे जानकय एतमु हैव प्रोवा
च वसिष्ठः सुदासे पैजवनाय ते ह ते सर्व एव महज्जग्मुरेतं भक्षं भक्षयित्वा सर्वे हैव
महाराजा आसुरादित्य इव ह स्म श्रियां प्रतिष्ठितास्तपंति सर्वाभ्यो दिग्भ्यो बलिमावहंत
आदित्य इव ह वै श्रियां प्रतिष्ठितस्तपति सर्वाभ्यो दिग्भ्यो बलिमावहति उग्रं हास्य राष्ट्रम
व्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानो यजमानः ॥३४॥ ७ ॥
इति सप्तमपंचिके पंचमोध्यायः ॥ शुभंभवतु ॥ श्री ॥ ७ ॥ ग्रामू ॥ ॥ ७ ॥
शुभमस्तु ॥